**अप्रमित** त्रि० न प्रमितः न०त०। १अपरिमिते २अनुपलब्धे च।

**अप्रमीय** त्रि० प्र+मा–बा० कर्मणि श० न०त० । अप्रमेये । "गजवाजिमुख्याः वाऽप्रमीयाः प्रमीयन्ते" श्रुतिः ।

**अप्रमूर** त्रि० प्र+मूर्च्छा–क्विप् प्रमूः मूर्च्छा अस्त्यर्थे कुञ्जादि० र न० त० ।१मूर्च्छायुक्तभिन्ने अमूर्च्छिते । "ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ऋ० १,९०,२, "अप्रमूराः अमूर्च्छिताः" भा० ।

**अप्रमृष्ट** त्रि० प्र+मृष–क्त न०त० । १ असोढ़े अक्षान्ते । प्र+मृज–क्त न०त० । २ अदृष्टे ३अप्रोञ्छिते प्र+मृश –क्त न०त० । ४अज्ञाते च ।

**अप्रमृष्य** त्रि० न प्रमृष्यः प्र+मृष–क्यप् न०त० । १ बाधितुमशक्ये । "सुदामं तद्रेक्णो अप्रमृष्यम्" ऋ० ६,२०,७ । "अप्रमृष्यं केनाप्यबाध्यम्" भा० ।

**अप्रमेय** त्रि० प्रमातुं ज्ञातुं परिच्छेत्तुं वा योग्यं न०त० १अपरिच्छेद्ये २बहुसंख्यकत्वाद्येववति ३इदमित्थमिति निश्चेतुमशक्ये "त्वमेकोह्यस्य सर्वस्य विधानस्य स्वयम्भुवः । अचिन्त्यस्याप्रमेयस्य कार्य्यतत्त्वार्थवित्प्रभुः" मनुः "स्वयंभुवोऽपौरुषस्य विधानस्य वेदस्य" कुल्लू० । "अशक्यञ्चाप्रमेयञ्च वेदशास्त्रमिति स्थितिः" मनुः । ४ ब्रह्मणि न० केनापि प्रमाणेन तस्य प्रमातुमशक्यत्वात् । वेदान्तिमते हि प्रमाणानि षट् प्रत्यक्षानुमानशब्दोपमानार्थापत्तियोग्यानुपलब्धिभेदात् तत्र परब्रह्मणः न प्रत्यक्षप्रमाणचक्षुरादिगम्यता रूपाद्यभावात् "अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यदिति" श्रुतौ तस्य रूपाद्यभावस्योक्तेः । नापि अनुमानगम्यता व्याप्तिलिङ्गाद्यभावात् "असङ्गोऽयं पुरुष" इति श्रुत्या तस्य सर्वसङ्गशून्यतोक्तेः नाप्युपमानगम्यता निर्द्धर्म्मकत्वेन, तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वलक्षणस्य सादृश्यस्य तत्राभावात् । न वार्थापत्तिगम्यत्वम् किञ्चिद्वस्तु विना अनुपपद्यमानस्यैवार्थस्यार्थापत्तिप्रमाणवेद्यतया तद्भिन्नवस्त्वभावेन तत्र तदसम्भवात् । न्यायमते च अर्थापत्तेर्व्यतिरेकव्याप्तिहेतुकानुमानेष्वन्तर्भावेण तल्लिङ्गस्य तत्राभावात् । योग्यानुपलब्धेश्चाभावमात्रप्रमाणत्वात् परब्रह्मणश्च सदात्मकत्वेनाभावरूपत्वाभावात् । नापि शब्दप्रमाणवेद्यत्वम् तत्र शाब्दबोधोपायशक्त्यादेरभावात् अतएव "यद्वाचा न मनुते येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" इति श्रुत्याऽस्य वागविषयत्वं निराकृतम् । न च लक्षणया तद्बोधः, शक्यसम्बन्धरूपलक्षणायाः निस्सम्बन्धे तस्मिन्नप्रवृत्तेः । अतएव "ब्रह्मन् ! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः । कथं चरन्ति ? श्रुतयः साक्षात् सदसतः परे" इति भागवते गुणवृत्तिश्रुतिगोचरताशून्यत्वमस्योक्तम् । न च प्रमाणागोचरत्वे तस्य कथं सिद्धिः ? कथं वा "तन्त्वौपनिषदं पुरुषं वेदेति" श्रुतौ "शास्त्रयोनित्वादिति" शा० सूत्रे च तस्य उपनिषद्वेद्यत्वमुक्तं संगच्छताम् ? शास्त्रजनितबुद्ध्यैव तस्य विषयीकरणात् तथात्वसङ्गतेः । तथा च शास्त्रजन्यान्तःकरणविषयत्वमेव तस्य न तु तदवच्छिन्नचैतन्यविषयतापि यथोक्तं "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निराकृतम् ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति" फलति प्रतिविम्बति बुद्धिवृत्तौ फलं चिदाभासस्तद्व्याप्यत्वं तद्विषयत्वं तेन यथा घटपटादीनां तदाकारबुद्धिवृत्तिप्रतिफलितेन चिदाभासेनैव प्रकाश्यता, न तथा, ब्रह्मणः स्वप्रकाशतया तस्य इतराप्रकाश्यत्वात् किन्तु स्वयं प्रकाश्यता न तु तत्रान्यापेक्षास्ति । परन्तु स्वाज्ञाननाशायैव बुद्धिवृत्तेरपेक्षामात्रं सा च शब्दजनितेति उपनिषद्वेद्यता इत्यसुभयश्रुतिसामञ्जस्यम् । वाचस्पतिमते तु शब्दादपि अखण्डाकारा काचित् दशमस्त्वमसीत्यादिवत् मनोवृत्तिरुदेति तद्विषयत्वादस्य शास्त्रवेद्यता । "मनसैवानुद्रष्टव्यमिति" श्रुतेस्तस्य मनोमात्रवेद्यत्वेऽपि "तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनमिति" शास्त्रात् मनःसंस्कारे च शास्त्रापेक्षणात् शास्त्रवृत्तिवेद्यता । न च मनोवृत्तिवेद्यत्वेऽप्रमेयत्वहानिः । असंस्कृतमनोविषयत्वाभावेनैव तथात्वात् "अवाङ्मनसगोचरमिति" वाक्यस्यापि तत्रैव तात्पर्य्यात् । मनोविषयत्वोक्तिरपि अज्ञाननाशार्थमनोवृत्तिमात्रवेद्यताभिप्रायेण, तदवच्छिन्नचिदाभासविषयत्वाभावाच्चाप्रमेयता "यन्मनसा न मनुते येन मनोऽनुमन्यते" इति श्रुतेस्तथार्थत्वात् । जगत्कर्त्तृत्वेन ईश्वरस्यानुमानेऽपि कूटस्थस्य तदनुमानगम्यत्वाभावात् ईश्वरस्यैव श्रुतिप्रमाणकत्वेन उपनिषद्वेद्यतोक्तिः । तदुत्तरं मननादिना श्रुतिवाक्यतात्पर्य्यावधारणेनाखण्डब्रह्माकारा चित्तवृत्तिरुदेति इति न काचिदनुपपत्तिः । नैयायिकादिमते तु तद्गुणगणस्य परिमातुमशक्यत्वात् दुष्टाशगावेद्यत्वाच्च अप्रमेयत्वमिति । प्र+मि+क्षेपे यत् न०त० । अपरिक्षेप्ये "यदाश्रौषं वासुदेवार्ज्जुनौ तो तथा धनुर्गाण्डिवमप्रमेयम्" भा० आ० प० ।

**अप्रयत्न** पु० प्रकृष्टो यत्नः प्रयत्नः प्रयासः अभावे न०त० । १प्रयत्नाभावे प्रयासाभावे । न०ब० । २प्रयासशून्ये त्रि० । "अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशय" मनुः ।